E-ISSN-2584-2870 DOI: https://doi.org/10.65833/dbs.2026.026

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# व्याकरणशास्त्रस्य वैशिष्ट्यबोधनपुरस्सरं तदध्ययनस्योपयोगिताया विचारः

**सहप्राध्यापको डा.भोलानारायण रेग्मी**
**व्याकरणविभागः,नेपाल-संस्कृत-विश्वविद्यालयसम्बद्ध -**
**श्रीविन्दुवासिनी-संस्कृत-विद्यापीठम् पोखरा**
**सम्पर्कसूत्रम् - ९८४६०६६५००**
**drbholanarayanremi@gmail.com**
**ORCID NO. 0009000712238330**

**सारः**

ज्ञानस्यादिस्रोतस्य वेदस्य षडङ्गानि सन्ति । तद्यथा - व्याकरण-निरुक्त ज्योतिषशिक्षाकल्पछन्दांसि तेषु व्याकरणं प्रधानं वर्तते। तद्विविना अन्यानि अङ्गानि निष्क्रियाणि निरर्थकानि भवन्ति । यथा शरीरस्य अङ्गानि मुखेन दीयमानैरन्नरसौषधादिभिरारोग्यानि पुष्टानि च भवन्ति, तथैव व्याकरणाध्ययनेन अन्यानि वेदस्याङ्गानि सार्थानि सफलानि पुष्टानि च भवन्ति । अतो व्याकरणाध्ययनस्य महत्त्वं सर्वोपरि वर्तते। तदध्ययनं मानवमात्रेणावश्यं कर्तव्यम्। अतो हि व्याकरणाध्ययनं विना मानवे मानवता नायाति, मानवस्य व्यावहारिकत्वात्। सर्वव्यवहारे च भाषा एव स्वाभिप्रायप्रकटयितुं माध्यमा भवति। भाषायाः सम्यग्ज्ञानं व्याकरणादेव भवति । सर्वासां भाषाणां स्वीयं व्याकरणं भवति। वैदिकभाषायाः प्रातिशाख्यं वैदिकव्याकरणमस्ति। लोके प्रचलिता याः काञ्चन भाषापरिकराः सन्ति । ता व्याकरणं विना नैव प्रसिद्धिमादधति । अतः सर्वा भाषाः सम्यग्ज्ञानं तस्या भाषाया व्याकरणाध्ययनमावश्यकमित्यत्र नास्ति शङ्कावसरः। भाषाणां श्रेष्ठा जननी च संस्कृतभाषा वर्तते । तस्या भाषाया व्याकरणं समुद्रवद् गभीरमस्ति, तथापि पाणिनिकात्यायनपतञ्जलिभिः सर्व व्यावहारिककार्यमनुभूय तत्र तत्र प्रसिद्धा भाषाः समेत्य व्याकरणं निर्मितं तस्या अध्ययनेनाऽन्यव्याकरणाध्ययनस्य गतार्थता भवतीति धिया व्याकरणशास्त्रस्य वैशिष्ट्यं तदध्ययनस्य उपयोगिता च प्रस्तूयते ।

**कूटशब्दाः- अध्ययनम्, आगमः, ऊहः, लघु, व्याकरणम् ।**

## विषयपरिचयः

जगत्यामस्याञ्चतुरशीतिलक्ष्यप्रकारका : प्राणिन उद्दिभज्जस्वेदजाण्डजजरायुजादिरूपेण परिभ्रमन्ति । तेषु चेतनशीलो जरायुजाऽन्यतमो मनुष्यो सामाजिकः प्राणी वर्तते। [1]समाजे व्यवहारार्थं सर्वदा विचारविनिमयस्य आवश्यकता दृश्यते । तदर्थं

[1] भाषाविज्ञाने पृ . स. १

भाषाया नितान्तमावश्यकत्वमानिवार्यत्वञ्चास्ति। तस्या भाषाया विशुद्धं पूर्णञ्च ज्ञानं कर्तव्य स्यात्। तच्च ज्ञानं तस्या भाषाया व्याकरणाध्ययनादेव जायते। अर्थप्रवृत्तितत्वानां शब्दा एव निवन्धनम्। तत्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥ [2]

सस्कृतभाषा द्विधा भवति ।लौकिकी वैदिकी च लोके प्रोक्ता(प्रयुक्ता) लौकिकी ,वेदे प्रयुक्ता वैदिकी उभयोर्भाषयोर्ज्ञानाय व्याकरणाध्ययनमावश्यकमस्ति। भाषा व्यापिका वर्तते विश्वेषु प्रचलिता या या भाषास्तासां जगतां जननी संस्कृतभाषा विद्यते। भाषाणां बीजभूता सर्वमान्या च। अस्या भाषाया व्याकरणशास्त्रमपि भाषाया व्यापकत्वात् स्वाभाविकरूपेण व्यापकं गभीरञ्च वर्तते।

समुद्रवद् व्याकरणं महेश्वरे तदर्धकुमम्भोद्धरणं बृहस्पतौ।
तद्भागभागाच्च गतं पुरन्दरे कुशाग्रविन्दूत्पतितं हि पाणिनौ ॥ [3]

षट्शास्त्रेषु चतुर्दशविद्यासु च व्याकरणस्यैव प्राधान्यमाकलयन्ति तत्तदाचार्याः। संस्कृतव्याकरणेषु ऐन्द्रचान्द्रादिषु पाणिनीयं व्याकरणं सर्वाङ्गपूर्णं पूर्वीयैः पाश्चात्यैश्च भाषाविद्भिः प्रशस्तिप्राप्तञ्च वर्तते। पाणिनीयाष्टाध्यायी सर्वोत्कृष्टा-सर्वाङ्गपूर्णा, विज्ञानसम्मतसूत्रात्मिका इत्यत्र नास्तिशङ्कापङ्ककलङ्कावसरः। यथा शरीरस्य मुखनासिकाकर्णहस्तपादेष्वङ्गेषु मुखं प्रधानभूतमङ्गं तथैव मुखमिव प्रधानत्वात् मुख्यं व्याकरणशास्त्रमपि। तच्च शास्त्रेषु श्रेष्ठतमम्-व्याक्रियन्ते व्युत्पाद्यन्त असाधुशब्देभ्यो विविच्य पृथक्कियन्ते साधुशब्या येनेति व्याकरणम् "शासनात् शंसनाच्चैव शास्त्रमित्यभिधीयते "इति शास्त्रस्य लक्षणं निष्कृष्टमस्ति। व्याकरणशास्त्रं हि भाषाया वास्तविकं स्वरूपं खण्डं खण्डं कृत्वा स्थापयति। भाषायाः शुद्धाऽशुद्धप्रयोजकनियमविशेषो व्याकरणं भवति। यद्विषयकममध्ययनप्रयोजनमपेक्षते तद्विषयकं ज्ञान हेतुर्भवति।

अत्रमूलम्-'विशेषज्ञाने सामान्यज्ञानं कारणम् 'न हि निर्विशेष्यं सामान्य भवति "वाक्यार्थज्ञाने पदार्थज्ञानं कारणम्" "घटितबुद्धौ घटकद्धिः कारणमित्यादिलौकिकन्यायविशेषाः। साधुत्वासाधुत्वप्रयोजकतानियमविशेषस्य व्याङुपसृष्टकात् कृद्धातोः करणाधिकरणयोश्च, इति सूत्रेण करणेऽर्थे ल्यूटि साधुत्वं प्राप्तस्य व्याकरणशब्दस्यार्थो यथा- असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिप्रयोजकतानियमविशेषो भवति। एवं भूतस्य व्याकरणशास्त्रविशेषस्य अध्ययनस्य किं प्रयोजनं किञ्च फलमितिप्रश्नः पाठकानां हृदि स्वत एव जायते कुत इति चेत् अनुबन्धचतुष्टयज्ञानोत्तरं प्रवृत्तिसामान्यं प्रति इष्टसाधनत्वप्रकारकस्य, कृतिसाध्यत्वप्रकारकस्य, कृत्साध्यत्वाननुबन्धित्वप्रकारकस्य च ज्ञानस्य कारणत्वात्, 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इत्युक्तेश्च। अतस्तादृश्यां फलविषयिण्यां प्रयोजकविषयिण्याञ्च जिज्ञासायां जातायां परमकारुणिकेन महामुनिना भगवता पतञ्जलिना "अथशब्दानुशासनम्" [4]इत्युक्त्वा अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते, शब्दानुशासनं नाम शास्त्राधिकारमारब्धव्यम् इत्युक्तम्। ततः केषां शब्दानाम् लौकिकानां वैदिकानाञ्चात्रानुशासनं क्रियते इति भाष्यकृता उक्त्वा अनन्तरं वर्णाभिव्यक्तानाम् वैखरीणां व्यापकत्वात् कार्यभूतत्वेन व्यावहारिकत्वेन विखरणाद् वैखरी उच्यते इत्यपि भणितम्। ततः शब्दस्य परिभाषां व्याख्याय कानि शब्दानुशासनस्य प्रयोजनानि ? इति जिज्ञासां समुद्भाव्य व्याकरणाध्ययनस्य प्रयोजनानि स्वीयकण्ठरवेणैवोक्तानि- "रक्षोहागमलध्वसंदेहा प्रयोजनम्" इदं प्रयोजनभाष्यम्। (तत्रैव पृ.सं. २० ) ततश्च इमानि भूयः शब्दानुशासनस्य प्रयोजनानि त्रयोदश दृष्टानि। अत्रेयं शङ्का समुदेति किमिदं कर्म सन्ध्योपासनादिवन्नित्यम् आहोस्वित् पुत्रेष्ट्यादियागवत् काम्यं तत्र सम्पूर्णस्यापि व्याकरणशास्त्रालोडनेन प्रकारान्तरेणान्ततोः धर्मार्थकाममोक्षाख्यानि चतुर्वर्गपुरुषार्थप्रतिनिधिभूतानि पाणिनीयव्याकरणाध्ययनस्य प्रयोजनानि मुख्यगौणभूतानि लभ्यन्ते।

शोधस्य समस्याः

---

2 भर्तृहरिः ,वाक्यपदीये १\१३।

3 सारस्वतभाष्ये पृ. सं. ८०।

4 व्याकरणमहाभाष्ये पृ. सं.५

**शोधो नाम अनुसन्धानं विद्यते । अस्मिन् लघ्वनुसन्धाने विविधैः साधकबाधकतर्कैरन्वेषणेन नूतनविषयस्योपस्थापने समागताः काश्चन समस्याः सन्ति ताश्च यथा –**

**१) किमिदं व्यकरणशास्त्रम् ?**

**२) तस्य वैशिष्ट्यञ्च किम् ?**

**३) व्याकरणशास्त्राध्ययनस्य उपयोगिता का ?**

**शोधस्य उद्देश्यम्**

**पूर्वोपस्थितानांमुपरिप्रदत्तानां शोधस्यात्मकानां प्रश्नानां समाधानमेवास्य शोधस्योद्देश्यं विद्यते यथा**

**१) व्याकरणपदार्थस्यार्थापनम्**

**२) व्याकरणशास्य वैशिष्ट्यबोधनम्**

**३) व्याकरणशास्त्राध्ययनस्य उपयोगिताया विचारः**

**अध्ययनविधिः**

अस्मिन् लघुशोधें सामग्रीसङ्कलननाय विशेषतया पुस्तकालयीयाध्ययनविधेरुपयोगः कृतो वर्तने । अध्ययनविधौ च प्राधान्येन निगमनात्को विधिः समवलम्बितो विद्यते । तथा च यथावसरं प्रतिपाद्यविषयानुरोधन व्याख्यान विश्लेषण – तुलनात्मकादयश्च विधयः प्रयुक्ताः सन्ति । व्याकरणशास्त्रस्य प्रशस्तिपरकाः तदध्ययनस्य उपयोगिताया विचारपरकाः सम्बद्धा ग्रन्था विदुषां लेखाश्चाऽस्याध्ययनस्य सामग्रीरूपेणोररी कृताः सन्ति । क्वचित् गभीरविषयविचारे स्वोपज्ञपद्धतिश्च समादृता अस्ति । शोधस्यास्य निष्पादने पाश्चात्यैरेतन्नाम्ना प्रचारिता ब्एब् इत्याख्या पद्धतिश्च स्वीकृता वर्तते ।

**अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च**

साधुत्वज्ञानविषयीभूतस्य व्याकरणशास्त्रस्य वैशिष्ट्यबोधनेन सर्वशास्त्रोपकारकस्याऽस्याऽध्यय नस्यौचित्यप्रतिपादका व्यकरणशास्त्रस्य इतिहासपरका टीकाग्रन्थाश्चास्यानुसन्धानात्मकलेखस्य मूलतःक्षेत्रं समि च वरीवर्ति ।

**सैद्धान्तिक आधारः**

भाषिके व्यावहारिके च जगति यस्य कस्यापि विषयस्य सैद्धान्तिकाधारं भवति, यतो हि सिद्धान्तस्य पर्याधारस्य च सर्वत्रापि आवश्यकता वरीवर्ति तद्विना सर्वमपि विषयजातं कार्यकलापश्च निष्प्रयोजनो निरर्थको वा भवति । वेदस्य षडङ्गेषु मुखमिव मुख्यमङ्गं व्याकरणशास्त्रं खलु भाषा जगति प्रधान्यामादाय विश्वस्मिन् प्रचलितां भाषाः पुष्पिताः पल्लविताः फलिताश्च दृश्यन्ते व्यावहारिके समाजे । व्याकरणेन विना वाणी न शोभते । तस्मात् तस्य वैशिष्ट्यबोधने तदध्ययनस्य उपयोगिताया विचारे व्याकरणशास्त्रस्येतिहासपरकाः, ग्रन्था व्याकरणमहाभाष्याद्याकरग्रन्था वादग्रन्थाः प्रकरणग्रन्थाश्चाधारत्वेन गृहीताः सन्ति ।

एवमेव तत्तद्ग्रन्थानां व्याख्यानक्रमे भाष्यप्रदीपोद्योतादि टीकाकाराणां कैयटस्य नववैयाकारणनागेशभट्टस्य चाऽन्यान् ग्रन्थाँश्च स्वीकृत्य प्रमाणवचनानि पर्याधारत्वेन स्वीकृतानि सन्ति

**विषयारम्भः**

व्याकरणशास्त्रस्य वैशिष्ट्यबोधने धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयफलप्रधाने कर्मनिबन्धने नानाविधसुखदुःखज्वालामालासमाकुलिते विचित्रेऽस्मिन् जगतीतले अतीव दुर्लभम्मानवजन्म। मानवजन्म लब्ध्वाऽपि धर्मसाधनमन्तरा न पुरुषार्थसिद्धिः । धर्माधर्मविवेकश्च साङ्गोपाङ्गवेदाध्ययनमन्तरेण न भवितुमर्हति । तदुक्तम् भगवता पतञ्जलिना -

"ब्राह्मणेन निष्कारणो 'धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । [5]

वेदाः मानवसंस्कृतेर्मूलभूताः महानिधयः परमेश्वरोपदिष्टत्वान्नित्याश्च ।

तदुक्तम् यजुर्वेदे -

"तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे ।

छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥" [6]

तत्त्वतो वेदाः नित्याः। अत्र केचित् वेदा अनित्याः शब्दमयत्वात् । व्याकरणशास्त्रस्य समालोडनेन चत्वारि प्रयोजनानि च लभ्यन्ते । तद्यथा - परमपरमप्रयोजनम् , - परमप्रयोजनम् ,मुख्यं प्रयोजनम् , गौणप्रयोजनम् । यथा- न्यायमीमांसावेदान्तादिशास्त्राणां मोक्षः प्रयोजनं तथैव व्याकरणशास्त्रस्यापि परमपरमप्रयोजनम् मोक्षो वर्तते। उक्तञ्च-

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।

इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥ [7]तत्रैव ।

यतः शब्दोऽनित्यः कार्यत्वाद् घटवत् । यथा घटः कृतोऽस्ति तथा शब्दोऽपि । तस्माच्छब्दानामनित्यत्वे वेदानामनित्यत्वमित्याहुः । नैवं शक्यम्, शब्दाः नित्याः, शब्दानां नित्यत्वाद् वेदानामपि नित्यत्वम् । तदुक्तम् पतञ्जलिना - नित्याः शब्दाः, नित्येषु शब्देषु कूटस्थैरविचालिभिवर्णैर्भवितव्यमनपायोपजनविकारिभिः । [8]

---

[5] पतञ्जलि व्या० महाभाष्यम् १।२ ।१

[6] (यजु० अ० ३१। मं० ७।।)

[7] ( वाक्यपदीये ब्रह्मकाण्डे पृ.सं. ३०। ७ )

[8] (पतञ्जलिः, व्याकरणमहाभाष्यम् १।१।२।)

अपि च "श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्द इति ॥"( तदेव, १।१।२॥)
अर्थाद् वैदिकाः लौकिकाश्च सर्वे शब्दाः नित्याः । यतो हि शब्दानाम्मध्ये कूटस्था विनाशरहिता अचला अनपाया अनुपजना अविकारिणो वर्णाःसन्ति । तस्माच्छब्दाः नित्याः, शब्दानां नित्यत्वाद् वेदानामपि नित्यत्वम् । धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयसिद्धये वेदाध्ययनमावश्यकम् ।
यथा शरीरम् नेत्रहस्तपादाद्यङ्गमन्तरेण सुखं नावतिष्ठते, तथैव वेदाध्ययनमपि न सम्भवति वेदाङ्गमन्तरेण । तथा च वेदाङ्गानि षट्- शिक्षा, व्याकरणम्, छन्दः, ज्योतिषम्, निरूक्तम्, कल्पश्चेति । तथा चोक्तम्पाणिनीयशिक्षायाम् -

छन्दः पादौ तु वेदस्य हस्तो कल्पोऽथ पठ्यते ।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् ।

तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥" [9]

शरीरावयवेषु प्रधानाङ्गं मुखमिव वेदाङ्गेषु व्याकरणं प्रधानम्, व्याकरणम् वेदस्य मुखं वर्तते । तदुक्तम् श्रीहरिणा-

आसन्नम्ब्रह्मणस्तस्य तपसामुत्तमं तपः ।

प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणम्बुधाः ॥" ( भर्तृहरेर्वाक्यपदीये,ब्रह्मकाण्डे श्लो. ११ )

अर्थात् वेदस्वरूपस्य ब्रह्मणः समीपस्थं साधुत्वप्रकारकबोधद्वारा तपसां ब्रह्मचर्याध : शयन-चान्द्रायण-सन्तोषस्वाध्यायसत्यभाषणपरोपकारेश्वरचिन्तनयोगाभ्यासादीनाम्मध्ये उत्तमं दृष्टादृष्टफलजनकतया तपः, अथ च छन्दसां-वेदानां प्रथमं मुख्यं प्रधानं वाऽङ्गं व्याकरणमिति बुधाः ऋतम्भराभरणभूषिताः ऋषयः प्राहुः कथयन्तीति तस्याऽभिप्रायः ।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्युत्पत्त्या करणार्थकल्युट्प्रत्ययान्तोऽयं व्याकरणशब्दः । शब्दानुशासनमिति व्याकरणस्यान्वर्थं नाम । अनुशिष्यन्ते असाधुशब्देभ्यो विविच्य बोध्यन्ते साधुशब्दा इत्यनुशासनम्, शब्दानामनुशासनम् शब्दानुशासनमिति व्युत्पत्त्या करणार्थकल्युट्प्रत्ययान्तः शब्दानुशासनशब्दो निष्पद्यते । शास्त्रपदेन सामानाधिकरण्याच्छब्दानुशासनं नाम शास्त्रम्, तच्च व्याकरणमेव ।

**व्याकरणशास्त्राध्ययनस्योपयोगिताया विचारः**

व्याकरणशास्त्रस्य समालोडनेन चत्वारि प्रयोजनानि च लभ्यन्ते । तद्यथा - परमपरमप्रयोजनम् , - परमप्रयोजनम् ,मुख्यं प्रयोजनम् , गौणप्रयोजनम् । तेषु यथा-

[9] ( पाणिनीयशिक्षा पृ.सं.२३ )

१ परमपरमप्रयोजनम्

यथा न्यायमीमांसावेदान्तादिशास्त्राणां मोक्षः प्रयोजनं तथैव व्याकरणशास्त्रस्यापि परमपरमप्रयोजनं मोक्षो वर्तते। उक्तञ्च-

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।

इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥( वाक्यपदीये ब्रह्मकाण्डे पृ.सं. ३०। ७ )तत्रैव।

अपि च-

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।

प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ॥

भगवान् भाष्यकारोऽपि वक्ति-

एकः शब्दः सम्यग्ज्ञातः सुष्टु प्रयुक्तः स्वर्गे लोके च कामधुग्भवति। अतो निर्विवादमेव व्याकरणाध्ययनस्य परमपरमप्रयोजनं मोक्षः

**२. परमप्रयोजनम्**

इदं शब्दशासनकरणभूतं शब्दशास्त्रं वर्तते। तस्मात् शब्दसाधुत्वप्रतिपादनमेव व्याकरणाध्ययनस्य परमप्रयोजनम्। भाष्यकृतापि "अथ शब्दानुशासनम्" इत्युक्त्वा शब्दसाधुत्वप्रतिपादनमपि प्रयोजनमुक्तम्-

अमरसिंहक्तस्यामरकोशस्य यथा "नामलिङ्गानुशासनंम्" [10]

मुख्यं नाम तथैवास्य व्याकरणशास्वस्यापि "शब्दानुशासनम् मुख्य नाम वर्तते। तच्च यौगिक तत्र इत्वं व्युत्पत्तिः अनुशिष्यन्त अनेनेति अनुशासनम्, शपम् = अज्ञानम् अव्यवहारभूत तिमिरं यति अवखण्डयतीति शब्दः, शब्दानाम्, अनुशासनम् शब्दानुशासनम् शब्दकर्मक साधुत्वकरणमित्यर्थः फलति। अतः शब्दसाधुत्वप्रतिपादनरूप परमप्रयोजनमपि निर्गतमेव।

**३. मुख्यं प्रयोजनम्**

व्याकरणाध्ययनस्य मुख्यप्रयोजनानि भगवता पतञ्जलिना पञ्च उक्तानि तानि च कानि इति जिज्ञासायामुच्यन्ते "रक्षोहागमलध्वसन्देहाः प्रयोजनम्"। अत्र भाष्यसूत्रे प्रयोजनशब्दः द्विधोपपन्नो भवतीति धिया लिखितो बर्तते। फलपरकः प्रयोजकपरकश्च, फलपरके इत्थं व्युत्पत्तिः प्रयुज्यते विधीयते यत् तत् प्रयोजन फलमित्यर्थः, कर्मणि ल्यूटि सति तस्य साधुत्वमवधेयम्। प्रयोजकपरत्वे तु प्रयोजयति व्याकरणाध्ययने प्रवर्तयतीति प्रयोजनः, प्रयोजकपरकप्रयोजनशब्दः पुलिङ्ग, बाहुलकात् कर्तरि ल्यूटि तस्य साधुत्व बोध्यम्। रक्षोहागमेति भाष्यसूत्रे आगमशब्दः प्रयोजनञ्च प्रयोजनञ्च प्रयोजनञ्च प्रयोजनञ्च प्रयोजनश्चेति प्रयोजनम् "नपुंसकमनपुसकेनैकवच्चास्यन्यतस्याम्"[11]

इति सूत्रेण एकशेषे नपुंसकस्यैवावशेपे विभाषया एकवद्भावश्च। अतः प्रयोजनमिति बहुत्वे विविक्षिते तु बहुवचनमपि साधुः। अतो व्याकरणाध्ययनस्य कि प्रयोजकत्व किञ्च फलमिति जिज्ञासा समुदेति अतो हेतोश्चत्वारि प्रयोजनानि फलभूतानि, एकश्च प्रयोजकत्वरूपो ज्ञेयः [12] भगवता पतञ्जलिना "अथ शब्दानुशासनमिति" व्याकरणस्य साक्षात् प्रयोजनमभिहितम्। सन्ध्योपासनादिनित्यकर्मवत् व्याकरणशास्त्राध्ययनस्य किं प्रयोजनमिति जिज्ञासायां व्याकरणमहाभाष्ये भगवता पतन्जलिना

10 (अमरकोशे सुधाटीकाया पृ.सं. ५ )

11 (पा. सू. १/२/६९)

12 ( पातञ्जलमहाभाष्ये प्रदीपे पृ.सं २३)

प्रोक्तम् -

"कानि पुनः शब्दानुशासनस्य प्रयोजनानि"[13] रक्षोहागमलघ्वसन्देहाः प्रयोजनम्-" इति। शास्त्रादौ विषयप्रयोजनाधिकारिसम्बन्धानां निरूपणमावश्यकम्। अत एवाऽस्य व्याकरणस्य को विषयः, किम् प्रयोजनम्, कोऽधिकारी, कश्च सम्बन्ध इति जिज्ञासायामुच्यते । लौकिकाः वैदिकाश्च शब्दाः विषयाः, तज्ज्ञानम्प्रयोजनम्, अधीतकाव्यकोशोऽनतव्याकरणशास्त्रस्तज्जिज्ञासुरधिकारी, प्रतिपाद्यप्रतिपादक भावश्चाऽत्र सम्बन्धः । व्याकरणमहाभाष्ये भगवता पतञ्जलिना अष्टादशप्रयोजनानि मुख्यगौणभेदेन व्याकरणाध्ययनस्योक्तानि । तद्यथा- "कानि पुनः शब्दानुशासनस्य प्रयोजनानि ? रक्षोहागमलध्वसन्देहाः प्रयोजनम् । ( तत्रैव १/१/१ ) इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि - तेऽसुराः, दुष्टः शब्दः, यदधीतम्, यस्तु प्रयुङ्क्ते, अविद्वांसः, विभक्तिं कुर्वन्ति, यो वा इमाम्, चत्वारि, उत त्वः, सक्तुमिव, सारस्वतीम्, दशम्याम्पुत्रस्य, सुदेवो असि वरुणेति ॥"

तान्येव व्याकरणाध्ययनस्य प्रयोजनानीह संक्षेपेण वर्ण्यन्ते-

रक्षार्थं वेदानामध्येयं व्याकरणम् । लोपागमवर्णविकारप्रकृतिप्रत्ययविभागज्ञो नि हि सम्यग् परिपालविष्यतीति । अत्रेदन्तत्त्वम् - लोके लोपाद्यदृष्टं पदं वेदे दृष्ट्वा भ्राम्येदवैयाकरणः, वैयाकरणस्तु नः भ्राम्यति, वेदार्थचाऽध्यवस्यति । अत्र लोपागमयोरुदाहरणं यया-देवा अदुर्हेति । दुहेर्लङो झस्याऽदादेशे कृते "लोपस्त आत्मनेपदेषु" [14]इति तलोपः, "बहुलं छन्दसि" [15] इति रूटि सति रूपमेतत् सिद्धयति । लोके च अदुहत इति प्रयोगो दृश्यते । एवम् मध्या कर्तोर्विततं संजभार-इत्यत्र हकारस्य भकारादेशः। लोके "संजहार" इति दृश्यते। वर्णविकारो यथा-उद्ग्राभं निग्राभं चेति । "हृग्रहोभश्छन्दसि हस्यवेति वक्तव्य" मिति वातिकेन हकारस्य भकारः। "उदि ग्रहः" [16]इत्पत्र "उद्ग्राभनिग्राभौ च छन्दसि स्रुगुद्यमनिपातनयो रिति" वचनादुन्निपूर्वाद् ग्रहेर्घञ् प्रत्ययः । लोके च उद्ग्राह, निग्राह इति दृश्येते ।

ऊहः खल्वपि- न सर्वेलिङ्गैर्नं च सर्वाभिर्विभक्तिभिर्वेदे मन्त्राः निगदिताः । ते चाऽवश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । तान्नाऽवैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् । [17]अयम्भावः-प्रकृतियागे विनियुक्तानाम्मन्त्राणां देवतादिवाचकपदानां विकृतियागस्य देवतादि-बोधनार्थं विपरिणाम ऊह इत्युच्यते । सर्वेषामिष्टियागान्तं दर्शपूर्णमासा प्रकृतिः, सर्वेषाञ्च सोमयागानामग्निष्टोमयागः प्रकृतिः । यस्मिन् यागे इति कर्तव्यतोपदिष्टा यागान्तरेणोपजीव्यते सा प्रकृतिः । यत्र च "प्रकृतिवद् विकृतिः कर्तव्यः " इति वचनात् प्रकृतियागेनोपजीव्यते सा विकृतिः । तत्र "प्रकृतिवद् विकृतिः कर्तव्ये" ति मीमांसकसिद्धान्तात् प्रकृतियागे पठितस्य "अग्नये त्वा जुष्टं निर्वपामी"ति मन्त्रस्य "सौर्यं चरुं' निर्वपेद् ब्रह्मवर्चसकामः" इति वचनानुसारेण सौर्ये चरौ विकृतियागे अग्निसम्बन्थिनिर्वापप्रकाशकमन्त्रस्याऽग्नि-पदस्य सूर्यसम्वन्धिनिर्वापप्रकाशनासमर्थत्वात्तदपहाय तत्स्थाने "सूर्याय त्वा जुष्टं निर्वपामि" व्यूहार्थमध्येयं व्याकरणम् ।

---

13 (पतञ्जलि व्या० महाभाष्यम् १।१ ।१)

14 ( पा.सू.७/१/४१ )

15 ( पा.सू. ७/१/८ )

16 (पा.सू. ३/३/३५ )

17 (पतञ्जलिः व्याकरणमहाभाष्ये १/१/१ )

बाह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । प्रधानञ्च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति । (पतञ्जलि: व्याकरणमहाभाष्ये पृ सं २३)अत्रेदं तत्त्वम्-

व्याकरणस्य पदपदार्थावगमद्वारा वाक्यार्थावगमोपयोगित्वात्तदध्ययन प्रयुक्तस्य वेदार्थाज्ञान प्रयुक्तस्य च प्रत्यवायस्य परिहारार्थमध्येयं व्याकरणम् ।लघ्वर्थञ्चाऽध्येयं व्याकरणम् । ब्राह्मणेनावश्यं शब्दाः ज्ञेया इति वचनात् शब्दानामानन्त्याच्च व्याकरणमन्तर। न केनचिल्लघुनोपायेन शब्दाः शक्या विज्ञातुम् । लौकिकानां वैदिकानां च शब्दानां साधुत्वाऽसाधुत्वज्ञानार्थं व्याकरणमेवैकः सरलः पन्थाः । तदुक्तम् श्रीहरिणा-

प्राप्तरूपविभागायाः यो वाचः परमो रसः ।
यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ।। [18]

असन्देहार्थञ्चाऽध्येयं व्याकरणम् । याज्ञिकाः पठन्ति "स्थूलपृषतीमनड्वा-होमालभेत" इति । तत्र सन्देहः स्थूला चाऽसौ पृषतीति स्थूलपृषती, स्यूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति तत्पुरुयो बहुव्रीहिर्वेति । तां नाऽवैयाकरणः स्वरतोऽध्यवस्यति । यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुषः । सर्वव्यवहारसम्पादकजात्यादिबोधकशब्दस्य रूपदोषकत्वादपि व्याकरणम्प्रशंसन् असन्देहरूपम्भाष्योक्तं प्रयोजनमाह हरि :-

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोधः शब्दानां नाऽस्ति व्याकरणादृते ।। ( तदेव १३)

सर्वो हि व्यवहारः शब्दमूलः । शब्दानां साधुत्ववोधो व्याकरणशास्त्रज्ञानमन्तरेण न भवितुमर्हति । तस्मादध्येयं व्याकरणम् ।

**४. गौणप्रयोजनम्**

तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः । तस्माद् ब्राह्मणेन न म्लेच्छितयवै नापभाषितवै । म्लेच्छो हवा एष यदपशब्दः । म्लेच्छा मा भूमेत्यध्येयं व्याकरणम् । स्वरतः वर्णतो वा मिथ्या प्रयुक्तः शब्दोऽभोष्टमर्थं न कथयति । तथा चोक्तम् महर्षिपतञ्जलिना -

दुष्टः शब्दः स्वरतो वर्णतो 'मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधाद् । [19]

दुष्टाञ्छन्दान् मा प्रमुक्ष्महीत्यध्येयं व्याकरणम्

एवं हि श्रुयते तैत्तिरीये ब्राह्मण यत्एकदा त्वष्टुः पुत्रं विश्वरूपमिन्द्रो

जघान, तदनन्तरं त्वष्टा इन्द्रसंहारायैकमभिचारयागम्प्रास्तौतत् । तत्र यागे सः "स्वाहेन्द्रशत्रुर्वर्द्धस्व" इति मन्त्रमुदाजहार । अत्र शत्रु शब्दः क्रियावाची, न तु संज्ञावाची । तस्मादयमर्थः शत्रुः शमयिता शातयिता संहारको वेत्यर्थः। अत्राऽयं सारांशः यत् त्वष्टुरिदमभिप्रेतमासीत् यत् हे अग्ने त्वमेवं वर्द्धस्व यत्तव ज्वालासमुत्पन्नो वृत्रासुर इन्द्रशत्रुभर्वेद् अर्थात् इन्द्रस्य नाशको जायेत । अयमर्थस्तदैव सम्भवति यदा खलु "इन्द्रशत्रुः"शब्दः समासान्तोदात्तो भवेत् । समासान्तोदात्ततायामेव तत्पुरुषसमासार्थबोधो भवितुमर्हति । अत्र त्वष्टा प्रमादेन पूर्वपदप्रकृति-स्वरेण युक्तं "इन्द्रशत्रु" शब्दं पठितवान्, तेनाऽयं शब्दो बहुव्रीहिसमासान्तो जातः । तदाऽयमर्थः प्रस्फुटितः, इन्द्रः शत्रुर्यस्येति । ततश्चाऽग्निज्याला समुत्पन्नो वृत्रस्तत्कालमेव हतो देवेन्द्रेण ।

---

[18] ( वाक्यपदीये ब्रह्मकाण्डे १२ )

[19] (पतञ्जलि व्याकरणमहाभाष्ये १/१/१ )

यथा शुष्कैधो जग्न्यभावे कुत्रचिदपि न प्रज्वलति तथैवार्थज्ञानरहितं शब्दपा रायणमात्रमध्ययनं व्यर्थम्। तथा चोक्तम् पतञ्जलिना-

यदधीतमविज्ञातं निगदेनैव शब्द्यते।

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥

तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्। ( तदेव १\१\१ )

यः कुशलः शास्त्रोक्तरीत्या शब्दप्रयोगं जानाति शक्य-लक्ष्य-तात्पर्यादितत्तदर्थविशेषे यथावत् शब्दान् प्रयुङ्क्ते, सोऽनन्तं विजयमत्र स्वर्गे लोके च प्राप्नोति, अथ चाऽवाग्योग विदपशब्दप्रयोगेण दुष्यति। उभयज्ञोऽपि वाग्योगवित् शब्दान् प्रयुङ्क्ते नापशब्दानिति ,ज्ञानपूर्वकशब्दप्रयोगादभ्युदयभाग् भवति। तदुक्तम् पतञ्जलिना-

"यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले। सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः॥"(तदेव, १।१।१॥ )

प्रवासादेत्य शिष्येण गुरोः समक्षं नामगोत्रोच्चारणपूर्वक प्रणामो विधेयः। स्त्रीवद् वक्तव्योऽयमहमिति। तदुक्तम् पतञ्जलिना-

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।

कामं तेषु तु विप्रोष्य स्त्रीष्विवाऽयमहं वदेत्॥

अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम्॥" [20]

याज्ञिकाः पठन्ति "प्रयाजाः सविभक्तिकाः कार्याः" इति ,न चान्तरेण व्याकरणम्प्रयाजाः सविभक्तिकाः शक्याः कर्तुम्, तस्मादध्येयं व्याकरणम्। (तदेव १\१\१ )

यो वा इमां पदशः स्वरोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति।आर्त्विजीनाः वयं स्यामेत्यध्येयं व्याकरणम्। ( तदेव १\१\१ )

व्याकरणाध्ययनमन्तरेण पदपदार्थज्ञानं न भवितुमर्हति। अतो निम्नवेदमन्त्रं व्याचक्षाणेन भगवता पतञ्जलिना व्याकरणाध्ययनस्य "शब्दरूपेण देवेनाऽस्माकं साम्यं" तद्रूपप्रयोजनसहकारेण समस्तपदानां वर्गीकरणम्बोधितम्

"चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥" (तदेव १\१\१ )

चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः त्रयः कालाः भूतभविष्यवर्तमानाः। द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्त हस्तासो अस्य सप्त विभक्तयः। त्रिधा बद्धः त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति। वृषभो वर्षणात्। रोरवीति शब्दं करोति। कुत एतद्? रौति शब्दकर्मा। महो देवो मर्त्यां आविवेशेति। महान् देवः शब्दः। मर्त्यां मरणधर्माणो मनुष्यास्तानाविवेश। महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्। अपर आह-

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।

गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥ (तदेव १\१\१ )

चत्वारि वाक्परिमिता पदानि। चत्वारि पदजातानि नामाख्यातोपसर्ग-निपाताश्च। नामादिरूपस्य एकैकस्य पदस्य परा-पश्यन्ती-मध्यमा-वैखरीभेदाच्चत्वारोंशाः।तानि विदुर्ब्राह्मणा ये मनीषिणो मनस ईषिणो मनीषिणः ;। गुहा त्रीणि निहिता नेङ्गयन्ति न चेष्टन्ते न निमिषन्तीत्यर्थः। तुरीयं वाचो(वैखरी नाम्ना लोके प्रसिद्धो-विखरणाद्वैखरी) मनुष्या वदन्ति। तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्तते चतुर्थमित्यर्थः।

---

[20] ( पतञ्जलिः व्याकरणमहाभाष्यम् १\१\१ )

वैयाकरणः शास्त्रबलेन तद्बललब्धयोगेन च व्याकरणप्रदीपेन गुहान्यकारं विदार्य सर्वं जानाति, तस्मात् सकलपदज्ञानाय मनीषित्वाय चाऽध्येयं व्याकरणम्।

पुनश्च भगवता पतञ्जलिना निम्नवेदमन्त्रमुपस्थापयता वाग्विस्तारसम्पत्तिरूपव्याकरणाध्ययन प्रयोजनम्प्रतिपादितम् -

उत त्वः पश्यन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्र जायेव पत्ये उशती सुवासाः ॥(१- पतञ्जलि - व्या० महाभाष्यम् १।१।१॥ )
अवैयाकरणः प्रत्यक्षेण शब्दस्वरूपमुपलभमानोऽपि अर्थापरिज्ञानान्न पश्यति, श्रृण्वन्नपि न श्रृणोत्येनाम् वाचम्। यथा पत्नी पतिं कामयमाना सम्यगलङ्कृता सती पत्ये आत्मानं दर्शयति तथैव वाग् वैयाकरणाय अनुप्रासादिविविधालङ्कारभूषिता सती स्वात्मानम्प्रकाशयति । वाङ् नो विवृणुयादात्मानमित्यध्येयं व्याकरणम् ।ततोऽसाधुशब्देभ्यो विविच्य साधुशब्दज्ञानरूपप्रयोजनमाह भाष्यकारः पतञ्जलिः-

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ।।(तदेव १\१\१ )

सक्तुः सचतेर्दुर्भावो भवति, कसतेर्वा विपरीताद्विकसितो भवति। तितउ-परिपवनं भवति-ततवद्वा तुन्नवद्वा। धीरा ध्यानवन्तः। मनसा प्रज्ञानेन वाचमक्रत वाचमकृषत। अत्रा सखायः सख्यानि जानते। अत्र सखायः सन्तः सख्यानि
जानते। क्व ? य एष दुर्गो मार्गः, एकगम्यो वाग्विषय। के पुनस्ते ? वैयाकरणाः। कुत एतत् ? मद्रैषां लक्ष्मीनिहिताधिवाचि। एषां वाचि भद्रा लक्ष्मीर्निहिता भवति। लक्ष्मीर्लक्षणाद् मासनाद् परिवृढा भवति।
अत्रेदन्तत्वम् ये व्याकरणे धीरा ध्यानवन्तः सन्तो ध्यानयुक्तमनसा तत्करणकज्ञानेन तितउना सक्तुमिव वाचमसाधुभ्यो विविक्तां कृतवन्तस्ते तत्करणेन शुद्धचित्ता अत्र शब्दब्रह्मणि शब्दार्थयोरभेदबुद्ध्याऽभेदज्ञानवन्तः सायुज्यानि प्राप्नुवन्ति। ब्रह्मणा नः साम्य यथा स्यादित्यध्येयं व्याकरणम्। वाजसनेयिनः पठन्ति-आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति । प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम् । (पतञ्जलिः -व्यायकरणमहाभाष्यम् १।१।१॥ )नामकरणेषु विहितनामस्वरूपज्ञानरूपं प्रयोजनमाह भाष्यकारः- "दशम्याम्पुत्रस्येति।"
याज्ञिकाः पठन्ति - दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तः स्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठिततमं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति । व्याकरणं विना कुदादिज्ञानाभावान्नामकरणासम्भवाद् व्याकरणाध्ययनमावश्यकम्। ( तदेव १\१\१)ततस्थ ऽन्तिमं प्रयोजनमाह भाष्यकारः-

"सुदेवो असि वरुण यस्य ते सप्त सिन्धवः।
अनुक्षन्ति काकुदं सूर्म्यं सुषिरामिव ।।" ( तदेव १\१\१ )

सुदेवो अति वरुण सत्यदेवोऽसि। यस्य ते सप्त सिन्धवः सप्त विभक्तयः । अनुक्षरन्ति काकूदम्। काकुदं तालु। काकु जिह्वा, साऽस्मिन्नुद्यत इति काकुदम्। सूर्म्यं सुषिरामिव। तद्यथा शोभनाभूमिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः सप्त विभक्तयस्तात्वनुक्षरन्ति। तेनाऽसि सत्यदेवः। अत्रेदन्तत्त्वम् - यतो हेतोर्व्याकरणज्ञानाद्वरुण। त्वं सत्यदेवोऽसि ततो हेतोरन्येऽपि सत्यदेवा भवन्ति । यथा सच्छिद्रां लौहमयीं प्रतिमां प्रविश्याऽग्निस्तत्रत्यमलादिकम्भस्मीकृत्य प्रतिमां शुद्धां करोति तथा सप्तसिन्धव इव सत्त्व विभक्तयोऽपि ताल्वनुप्राप्य प्रकाशन्ते। सत्यदेवा वयं स्यामेत्यध्येयं व्याकरणम्।
ननु वैयाकरणाः साधुशब्देष्विव 'घड़ा' 'गगरी' 'थाली' 'घर' 'पानी' प्रभृतिष्वसाधुशब्देष्वपि अर्थबोधयकताशक्तिं स्वीकुर्वन्ति। यदा असाधुशब्देभ्योऽप्यर्थोऽवगन्तुं शक्यते, तर्हि किं व्याकरणाध्ययनेन ? इति शङ्कायाम्महामाष्ये भगवतापतञ्जलिना - "समानायामर्थावगतो' शब्देन चापशब्देन शास्त्रेण धर्म नियमः" इति "लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः" ( तदेव १\१\१) इति चाऽभिधाय साधुशब्देनैवार्थज्ञाने पुण्यं भवति, नापशब्देनार्थज्ञाने इति स्वीकृतम्। अत्र "एकः शब्दः सम्यग्ज्ञातः,

शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवतो "ति महाभाष्योक्तिः सङ्गच्छते । एवं साधुत्वाऽसाधुत्वज्ञानार्थं पुण्यलाभार्थं ञ्च व्याकरणशास्त्राध्ययनमावश्यकम् भवति ।

किम्बहुना । व्याकरणशास्त्रनमन्तरेण वेदानामर्थां ज्ञातुन्न शक्यते। अतो वेदबोधितेष्टसाधनताकं कर्म कुर्वद्भिरपि जनैर्न तत्फलं प्राप्यते ।

व्याकरणशास्त्रम् आयुर्वेद इव वाङ्गलानां चिकित्सकः, सर्वविद्यादृतः, सर्वविद्याभ्यःपवित्रः सन् मोक्षाख्यपरमपुरुषार्थप्राप्तये एकः सरलः पन्थाः । लोके सर्वाः विद्याः शब्दैर्निबद्धाः, अतः सर्वासां विद्यानां शक्तिग्राहकः सन् व्याकरणम् वेदज्ञानद्वारा मोक्षस्य द्वारं वर्तते। किञ्चिदम् -मोक्षङ्कामयमानानां कृते सिद्धिसोपानपर्वणामाद्यं पदस्थानम्, अकुटिलो राजमार्गश्च वर्तते, ततश्च ब्रह्मसाक्षात्कारो जायते तथा चोक्तम् श्रीहरिणा-

तद् द्वारमपवर्गस्य वाङ्गलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यम्प्रकाशते ॥ [21]
यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः ।तथैव लोके विद्यानामेषा विद्या परायणम् ॥
"इदमाद्यम्पदस्थानम् सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्वा राजपद्धतिः ॥
अत्रातीतविपर्यासः केवलामनुपश्यति ।
छन्दस्यश्छन्दसां योनिमात्मा छन्दोमयीं तनुम् ॥
प्रत्यस्तमितभेदायाः यद् वाचो रूपमुत्तमम् ।
यदग्निनेव तमसि ज्योतिः शुद्धं प्रवर्तते ॥ [22]

**निष्कर्षः**

साधुत्वाऽसाधुत्वज्ञानार्थं पुण्यलाभार्थञ्च व्याकरणशास्त्राध्ययनमावश्यकम् । किम्बहुना व्याकरणशास्त्रमन्तरेण वेदानामर्थो ज्ञातुन्न शक्यते । अतो वेदबोधितेष्टसाधनताकं कर्म कुर्वद्भिरपि जनैर्न तत्फलं प्राप्यते ।व्याकरणशास्त्रम् आयुर्वेद इव वाङ्गलानां चिकित्सकः, सर्वविद्यादृतः, सर्वविद्यापवित्रः सन् मोक्षाख्यपरमपुरुषार्थप्राप्तये एकः सरलः पन्थाः । लोके सर्वाः विद्याः शब्दनिबद्धाः, अतः सर्वासां विद्यानां शक्तिग्राहकः सन् व्याकरणम् वेदज्ञानद्वारा मोक्षस्य द्वारं वर्तते। किञ्चेदम् मोक्षङ्कामयमानानां कृते सिद्धिसोपानपर्वणामाद्यं पदस्थानम्, अकुटिलो राजमार्गश्च वर्तते, ततश्च ब्रह्मसाक्षात्कारो जायते तथा चोक्तम् श्रीहरिणा-

तद् द्वारमपवर्गस्य वाङ्गलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यम्प्रकाशते ।

व्याङुपसृष्टकात् कृधातोः 'करणाधिकरणयोश्च' इति सूत्रेण करणेऽर्थे ल्यूटि सति साधुभूतस्य व्याकरणशब्दस्य अर्थ असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्ककृतिप्रयोजकतानियमविशषो भवति । भगवता पतन्जलिना लक्ष्यलक्षणात्मकं व्याकारणं साधितम् । तथा च भर्तृहरिणा-

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम् ॥

---

[21] (भर्तृहरि-वाक्यपदीयम् । ब्रह्मकाण्डम् । १४-१५॥ )

[22] (३- भर्तृहरि-वाक्यपदीयम् । ब्रह्मकाण्डम् । १६-१८॥ )

इत्यनया कारिकया वाक्यपदीयवह्मकाण्डे व्याकरणशास्त्रस्य स्मृतिकथनेन अनाद्यनन्तसाधुत्वज्ञानप्रतिपादकवेदप्रमाणाभ्युपगन्तृतया शिष्टानां परम्परया अस्मदाचायैस्मर्तव्यम्, इति प्रशस्त्यर्थवादानां वाक्यानां पार्यायत्वेन प्रकटितम् । परमत्राकूतम् - इदानीमपि व्याकरणशास्त्रस्य ततोऽपि सस्कृतव्याकरणशास्त्रस्य तत्रापि पाणिनीयव्याकरणस्य अध्ययने किं फलम् लभ्यत इति समेषां हृदि जायमानायां जिज्ञासायां सत्यां पाणिनीयव्याकरणशास्त्रस्य साम्पूर्णसफलान्तिमव्याख्यात्रा पतञ्जलिना दृष्टान्तद्राष्टांन्तिकविधया उदाहरणप्रत्युदाहरणदीनि प्रदश्य व्याकरणशास्त्रस्य प्रयोजनपूर्वकं तदध्ययने प्रयोजनानि प्रदर्शितानि तमेव विषयमादाय महामाष्तिरिक्तेषु ग्रन्थेषु विकीर्णानि प्रमाणानि समेत्य अनुसन्धितविषयप्रतिपादकमिदमनुसन्धानमीति निष्कृष्टिः ।

**आधमर्ण्यप्रकटनम्**

अस्य लघुशोधस्य प्राविधिकदृष्ट्या शोधसामग्रीसङ्कलनकार्यदृष्ट्या विषयप्रतिपादनदृष्ट्या तथा चास्य परीक्षणं विधाय परिष्काराय सम्पादनाय च प्रत्यक्षेण परोक्षेण वा परामर्शं प्रदाय महदुयकारं कृतवद्भ्यो विज्ञेभ्यो गुरुतरेभ्यो गुरुवरेभ्य अन्येभ्यः सहयोगिभ्यः सहृदयेभ्यश्च हार्देन सश्रद्धं कार्तज्ञेन सहाधमर्ण्यं प्रकटयामि ।

**सन्दर्भग्रन्थानां सूची-**

कौण्डभट्टः (वि.सं २०४५) वैयाकरणभूषणसारः, वाराणसी सम्पूर्णानन्द संस्कृत विश्वविद्यालः ।

जिज्ञासु, ब्रह्मदत्तः (वि.सं २०५६) अष्टाध्यायी भाष्यप्रथमावृत्तिः , हरियाणा, रामलाल कपुर ट्रस्ट ।

तिवारी, भोलानाथः, भाषा विज्ञान, इलाहाबाद, किताब महल, १५ बानंहिलरोड, ई सं १९५१ ।

दीक्षितो भट्टोजी, वैयाकरणसिद्धान्तकौमुदी, सतत्वबोधिनी। बम्बई खेमराज श्रीकृष्णदास, मालिक श्रीवेङ्कटेश्वर स्टीम(प्रेस, वि।सं। २०४०।

नागेशभट्टः (वि सं २०४१) परमलघुमञ्जूषा, वाराणसी, श्रीकृष्ण दास अकादमी

पतञ्जलिः (सन् १९८७) व्याकरणमहाभाष्यम्, चौखम्बा संस्कृत प्रतिष्ठानम् ।

पाठकः, रङ्गनाथः (वि.सं २०२४) स्फोटदर्शनम्, बिहार राष्ट्र भाषा परिषद् ।

पतञ्जलिः, पाणिनीयव्याकरणमहाभाष्यम्, प्रदीपोद्योतेन समुल्लसितम्० पुनर्मुद्रितसस्करणम् दिल्लीस् चौखम्बा सस्कृत प्रतिष्ठान ।

पाण्डेयः , रामाज्ञा (वि.सं २०३९) व्याकरणदर्शनभूमिका, वाराणसी , सम्पूर्णनन्द संस्कृत विश्वविद्यालय ।

पाणिनिः, अष्टाध्यायी चतुर्थसंस्करणम् चौखम्बा सुरभागती प्रकाशन वाराणसी सन् १९९२ ।

पाणिनीः, धातुपाठः,युधिष्ठिरमीमांसकेन सम्पादितः, हरियाणा रामलाल कपूर ट्रष्ट, वहालगढ १३१०२१ जिला सोनिपात सन् १९९६

भट्टो नागेशः प्रायश्चित्तप्रदीपः, वाराणसी चौखम्बा सुरभारती प्रकाशन, ई सं १९७८।

भर्तृहरिः, वाक्यपदीयम्, वाराणसी, चौखम्बा सुरभारती प्रकाशन, ई सं १९९५।

यजुर्वेदः, सम्पादनं पं. दोलतरामगौडवेदाचार्य, रूपेश ठाकुरप्रसाद प्रकाशन कचौडी गल्ली वाराणसी सन् २००४।

सारस्वतभाष्यम्, साभार गण्डीवात्, बाराणसी संरसं वि।स १९८७।

शर्मा, रघुनाथः (वि.सं २०२८) व्याकरणदर्शनविन्दुः, वाराणासी, वाराणसेय–संस्कृत–विश्वविद्यालयः।